Regd. No. KA/SK/MYS-107/2015-17
R.N.I. No. 20007/70

स्थापना : 1970

E-mail-sudharma.sanskritdaily@gmail.com
E-paper-sudharma.epapertoday.com
Website-www.sudharmasanskritdaily.in

# सुधर्मा

सुधर्मा संस्कृतदिनपत्रिका, मैसूरु. धर्मो रक्षति रक्षितः

संस्थापकसम्पादकः
गीर्वाणवाणीभूषणं विद्यानिधिः
पण्डित कळले नडादूरु वरदराजय्यङ्गार्यः

केन्द्र-कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका
SUDHARMA-THE ONLY SAMSKRITHA DAILY

सम्पुटः-४७ सञ्चिका -७१ मैसूरु श्रीदुर्मुखीनामसंवत्सरे दक्षिणायणे शरदृतौ आश्वयुजशुक्ल प्रतिपदादि त्रयोदश्यां पूर्वाभाद्रानक्षत्रयुक्त शुक्रवासरः १४ अक्टोबर २०१६ मूल्यम्: ₹ १.२५

## सुभाषितम्

तरतु विवित्सयाब्धिमधिरोहतु शैलतटं
धमतु च धातुवर्गमधिगच्छतु शस्त्रमुखम् ।
तदिदमरुन्तुदं यदुत बह्ववधाय भिया
धनमदमेदुरक्षितिभृदङ्गणचंक्रमणम् ॥

## अश्वशकटसारथीनां दुरवस्था

वयं पूर्वकाले मैसूरुनगरे बहूनि अश्वशकटानि अपश्याम । रेलस्थानात् बस्यानस्थानाच्च गृहं गन्तुं सर्वे अश्वशकटनम् एव अवलम्बन्ते स्म । गृहस्य पुरस्तात् यदि अश्वशकटं स्थितम्, तर्हि बन्धूनाम् आगमनम् इति जनाश्चिन्तयन्ति स्म । एषा स्थितिर्न केवलं मैसूरुनगरे, अपि तु सर्वेषु नगरेष्वासीत् । ततः तैलप्रेरितानि त्रिचक्रवाहनानि, ततश्च चतुश्चक्रयानानि जनप्रियाण्यभवन् । अश्वशकटानां संख्या क्षीणा अभवत् । सम्प्रतिमैसूरुनगरे पञ्चषाण्येव अश्वशकटानि दृश्यन्ते ।

दशरात्रोत्सवसन्दर्भे केचन प्रवासिनः अश्वशकटप्रयाणं चिकीर्षन्ति । न कार्याय, अपि तु विनोदाय । तेषां कृते कचनाश्वपालकाः शकटानि अलंकृत्य मख्यशृङ्गाटकेषु स्थापयन्ति । तथापि तेषां दुरवस्था शोचनीयैव वर्तते । अश्वस्य घासाय प्रत्यहं शताधिकानि रूप्याणि व्ययीकरणीयानि । यदि ग्राहको न लभ्यते, तर्हि सारथेरुपवास एव । ऋणं कृत्वा अश्वाय कुलित्थभोजनं देयम् । शकटस्यालङ्करणाय, भवनचक्रादीनां नवीकरणाय भूरि धनं देयम् । सर्वकारः किमपि साहाय्यं न ददाति । मार्गे यदि कोऽपि अपघातः स्यात्, तर्हि सारथेः क्लेशपरम्परा । जीवनम् अतीव दुर्भरं भवति । संस्कृतेः अङ्गभूतं किल अश्वशकटं कथाशेषं भवति ।

## भारतं प्रवेष्टुं रहसि उग्राः स्थिताः

नवदिल्ली-पाकिस्तानमूलात् समुत्पन्नाः शिक्षिताः २५० भयोत्पादकाः उग्राततायिनः काश्मीर सीमाप्रदेशान् परितः रहसि स्थित्वा भारतं प्रवेष्टुं सन्नद्धाः। एते भारतीय सेनायोधवृन्दान्युपरि आक्रमणानि कर्तुं निरीक्षमाणा वर्तन्ते इति आतङ्कारिविषयं गुप्तचरविभागात् ज्ञाता। केन्द्रसर्वकारप्रशासकाः जागरूकाः समभवन्। लष्करे तोयिबा जैषे मोहम्मद् हिज्बुल् मुजाहिद्दीन् सङ्घटनानां २५० संख्याकाः उग्राततायिनः कतिपय दिनेभ्यः प्रागेव भारतदेशस्य सीमा प्रदेशान् अतिक्रम्य भारतं रहसि प्रविविशुरिति आतङ्ककारिणः ऊचुः। अत एव केन्द्रसर्वकार-प्रशासकाः जम्मुकाश्मीरस्य रक्षणाबलानाम् अधिकारिणः सर्वदा शत्रुदमनाय देशरक्षणाय जागरूकाः सन्नद्धा भवेयुरिति सूचितवन्तः। सीमानियन्त्रणरेखा स्थलेषु अन्ताराष्ट्रियसीमाप्रदेशेषु भारतीय सेनाबलयोधाः जागरूकास्सन्तः शत्रून् ज्ञातुं रहसि स्थिताः। एवमेव अन्ये शतसंख्याकाः उग्राततायिनः भारतस्य अन्तः प्रवेष्टुं सीमा-नियन्त्रणरेखास्थलेषु निरीक्षमाणा वर्तन्ते इत्यपि विषयवार्ता समधिगता।

## पन्नीरसेल्वं जयललिताप्रतिनिधि मुख्यमन्त्री

चेन्नै-तमिळुनाडुराज्यस्य मुख्या-मात्या जयललिता रुग्णासती चेन्नै नगरे चिकित्सालयेऽस्ति। सा अधुना मुख्यमन्त्रिस्थानकार्याणि निर्वोढुम् अशक्ता । तस्या। विज्ञापानुसारात् तमिळुनाडुराज्यस्य राज्यपालः विद्यासागरराव् वित्त-मन्त्रिणे पन्नीर्सेल्वाय निर्वोढुम् आदिदेश। पन्नीरसेल्वं जयललितायाः मुख्यामात्यस्थाने प्रतिनिधिमुख्यमन्त्री भूत्वा कार्याणि निर्वहति। एषः जयललिताः अष्टानां

## दशरात्रोत्सवः सम्पन्नः



मैसूरु-समग्रे देशे दशरात्रोत्सवः सम्पन्नः। विजयदशम्यां मैसूरुनगरे गजयात्रोत्सवः महता वैभवेन प्राचलत् । लक्षशो जना देशस्य नाना भागेभ्यः आयाताः अद्भुतम् उत्सवं दृष्ट्वा आनन्दतुन्दिलाः समभवन् । महागजस्य अर्जुनस्योपरि सुवर्णमण्टपे शोभमानां जगन्मातरं चामुण्डेश्वरीं दर्शं दर्शं भक्ताः जयघोषान् अकुर्वन् । राजसौधस्य पुरस्तात् कर्णाटक - राज्यमुख्यमन्त्री श्री सिद्धरामय्यः चामुण्डेश्वर्यै पुष्पार्पणम् अकरोत्। शतशः कलाविदो नानाचमत्कारान् प्रदर्शयन्तः जनान् रञ्जयन्ति स्म । सुन्दराणि स्तब्धचित्राणि कर्णाटक राज्यस्य अभिवृद्धिं द्योतयन्ति स्म । तैः इतिहासस्य संस्कृतेश्च चित्राणि प्रजाभ्यो दर्शितानि जानपदा अपि कलासु चातुर्यं प्रादर्शयन् ।

राजसौधे राजवंशस्य श्रीमान् यदुवीरकृष्णदत्तचामराजवोडेयर् महाभागः सम्प्रदायानुसारेण शमीपूजाम् अकरोत् । एवं वज्रमुष्टि-युद्धे भागम् ऊढवद्भ्यः मल्लश्रेष्ठेभ्यः सम्भावनां प्रादात्। दशरात्रोत्सवः प्राचीननवीनयोः सङ्गमो भूत्वा देशस्य संस्कृतेः प्रदर्शने सफलोऽभवत्। अनेके वैदेशिका अपि उत्सवं दृष्ट्वा प्रहृष्टाः प्राशंसन् ।

## उग्राततायिनः नाशयिष्यामः

नवदिल्ली-उग्राततायिनः पार्श्वदेशात् भारतान्तः प्रविष्टास्सन्तः निरप-राधिनः सज्जनान् जनान् मारयन्त-स्सन्ति । अन्यदेशप्रशासकाः केचन एतान् पोषयन्तः प्रचोदन्तस्सन्ति। एतैः पालिताः पोषिताश्च उग्राततायिनः भारतदेशं रहसि प्रविश्य भयोत्पादककृत्यानि कुर्वन्तः जनान् नाशयन्तस्सन्ति । एतानि कुकृत्यानि न वयं सहामहे। वयं शान्तिप्रियाः । शान्त्या प्रीत्या सौहार्देन च स्थातुमिच्छामः। किन्तु यदि एते उग्राततायिनः एवमेव कुकृत्यानि कुर्वन्तश्चेत् तदा एतान् वयं नाशयिष्याम एव। अनिवार्य स्थितौ युद्धमपि कर्तुं वयं सन्नद्धाः इति भारतस्य प्रधानमन्त्री नरेन्द्र मोदि लखनउनगरे अशिभाग्नामक स्थले दसरापर्वनिमित्तं समाचरिते रामलीलापर्वणि भागीसन् भाषमाणः परोक्षं पाकिस्थानप्रशासकान् उद्दिश्य प्रबोधयामास । प्रप्रथमं भयोत्पादन कृत्यं रामायणकालीनः जटायुपक्षी निरुद्धवान् । रावणनामकः असुरः यदा सीतामपहृत्य लङ्कां गच्छति स्म तदा तस्य कुकृत्यं खण्डित्वा तेन सह समायुध्य सीतां रक्षितुं प्रयतितवान् । राम इव भवितुं नैव शक्ताः। परं जटायुरिव भवितुं प्रयतेमहि। देशरक्षणाय सर्वे सन्नद्धा भवेयुः। दुष्टानां दमनानि प्रजानां पालनानि अस्मदीय कर्तव्यानि तानि वयं करिष्याम एव इत्यवदत् सः।

सचिवस्थानानां कार्याणि निर्वहन् सचिवसम्पत्सभायाः कार्याणि निर्वहन् सचिवसम्पुटसभायाः नेतृत्वमपि समावहति इति राज्यपालस्य कार्यालयप्रकटनात् विषयः समवगतः।

## गन्धहुडि उत्सवः

मैसूरु- अत्रत्ये वेङ्कटेश सभायाः आश्रये १६-१०-२०१६तमे दिनाङ्के भानुवासरे श्री वेदान्ताचार्याणां गन्धहुडि उत्सवः सायं सप्तवादनतः दशवादन पर्यन्तं

## विजयदशमी विजयम् आनयत्

इन्दूर्-विजयदशम्यां भारतवर्षस्य क्रिकेट् क्रीडकाः अद्भुतं कौशलं प्रदर्श्य न्यूजिलेण्ड्देशस्य क्रीडक-समुदायं पराजित्य विजयलक्ष्मीम् आलिङ्गन् । स्पर्धात्रयसरण्यां तिस्रोऽपि स्पर्धाः भारताय विजयम् एव प्रायच्छन् इति महतः प्रमोदस्य स्थानम्। कोहलीविराटो भारतसमुदायस्य नायको भूत्वा विजयम् आनैषीदिति विशेषतः अभिनन्दनम् अर्हति ।

## नवदिल्ल्यां रामलीला

नवदिल्ली-विजयदशमीदिवसे राष्ट्रस्य राजधान्यां नवदिल्ल्यां रामलीला सम्पन्ना । रावणसंहारस्य दिनमिदम् इति तत्र रामलक्ष्मणवेषधारिणौ युवानौ नाणप्रयोगं कृत्वा साङ्केतिक-तया रावणसंहारम् अकुरुताम्। अस्मिन् उत्सवसमारम्भे प्रधानमन्त्री श्रीमान् नरेन्द्रमोदिः भागम् अवहत् । सहस्रशो जनाः उपस्थिताः भूत्वा आनन्दम् अन्वभवन्। दुष्टसंहारस्य शिष्टरक्षणस्य च सङ्केतो रामलीलोत्सवः ।

कोल्कत्तानगर्यां सन्दर्भेऽस्मिन् देवीपूजा प्रवृत्ता। विजयदशमी देशस्य सदा विजयदायिनी भूयात् ।

## श्रीचामुण्डाम्बिकायाः रथोत्सवः

मैसूरु - श्री चामुण्डाम्बिकायाः वार्षिक रथोत्सवः मासस्यास्य पञ्चदशतम दिनाङ्के शनिवासरे प्रातः संभविष्यमाणे शुभलग्ने प्रचलिष्यति। महाराणी श्रीमती प्रमोदादेवी, यदुवीरकृष्णदत्त चामराजवोडेयरश्च प्रथमापूजां च करिष्यति।

## गजसमूहस्य प्रतिनिवर्तनम्

मैसूरु-विश्वविख्यात विजय-दशमीपर्वणः शोभायात्रायां संभागिभिः एकादशगजैः साकं हस्तिपवनः सकुटुम्बाः स्वस्थानानि प्रतिनिवृत्ताः। गजेभ्यः त्त्क्षुगुडादीनां भोजनं हस्तिपकेभ्यः विशिष्टान्नसंभारश्च प्रादायीति ज्ञायते।

श्री राजसौध प्राङ्गणे विराजमानः श्री श्वेतवराहस्वामिनां देवालये प्रचलिष्यति।